ईश्वरस्वरूप स्वामी लक्ष्मण जू महाराज

की हस्तलिखित

स्नान-सन्ध्योपासना विधिः

श्रीगुरुगीता सहित

ईश्वर आश्रम ट्रस्ट

ईशबेर, निशात, श्रीनगर, कश्मीर

4 मई, 1997

मूल्य : रु. 20

दो शब्द

"शरीरमाद्यं खलु धर्मसाधनम्" अर्थात् स्वस्थ शरीर ही धर्मानुष्ठान का प्रमुख साधन है। स्वस्थ शरीर के लिए व्यक्ति में अच्छी आदतों और अनुशासन का होना आवश्यक है। शारीरिक व आत्मिक स्वच्छता और स्वास्थ्य के लिए ऋषियों मुनियों ने वैदिक काल से स्वच्छजल की महत्ता को स्वीकारा है। "आपो हिष्ठा मयोभुवः" कहकर वेद ने जल को कल्याण का उत्पत्ति स्थान माना है। "सलिलं जीवनं" कहकर जल को जीवन कहा है। दैनिक स्नान को शरीर मन तथा स्नायुओं का स्फूर्तिवर्धक बताया है। स्नान के समय ईश्वर का नामस्मरण करने से बाह्य और आन्तरिक पवित्रीकरण होकर आत्मशुद्धि होती है इस सत्य को बार बार दोहराया गया है। इसी लक्ष्य को ध्यान में रखकर "स्नान विधि" और "सन्ध्योपासनाविधि" का विधान प्राचीनकाल से प्रवर्तन में आया है और यह विधान शास्त्रोक्त परंपरा का अंगभूत होने के साथ साथ अतिवैज्ञानिक बन पड़ा है। हमारे सद्गुरु महाराज ने अपने शिष्यों भक्तों व साधकों की आत्मिक उन्नति के लिए स्नान और सन्ध्योपासना विधि का महत्त्व उन्हें अच्छी तरह से समझाया और इसे दैनिक साधना का प्रधान अंग बताया। सन्ध्योपासना से ही नित्य कर्म का श्रीगणेश साधक के लिए आवश्यक कहा गया है क्योंकि सन्ध्योपासना में बताये गये "अघमर्षण" मन्त्रों से ही प्रातः दिन और सायं को अज्ञान से, विस्मृति से और भ्रान्ति से किये गये पापों की निवृत्ति होती है और खाने के अयोग्य या अशुद्ध पदार्थों के सेवन से लगे हुए पापों से छुटकारा मिलता है। स्वस्थ जीवन के लिए इन अघमर्षण मन्त्रों की महत्ता अब आप स्वयं आंक सकते

हैं। इसके अतिरिक्त शरीर के प्रत्येक अंग को मन्त्राभिषिक्त जल से पवित्र करके दैनिक अभ्यास व साधना के लिए उपयुक्त बनाना और 'महागायत्री' मन्त्र के यथासंभव जाप से परमपद की ओर आगे बढ़ना सन्ध्योपासना का प्रमुख उद्देश्य है।

ईश्वर आश्रम ट्रस्ट के अधिकारी 'बब' उपनाम से गुरु भाईयों में प्रसिद्ध श्री शम्भूनाथ जी वारिकू के अतीव आभारी हैं, जिन्होंने सद्गुरु महाराज की हस्तलिखित स्नान और सन्ध्योपासना विधि के साथ 'श्री कुलार्णव तन्त्र' में लिखित 'श्री गुरुगीता' की हस्तलिखित प्रति भी ट्रस्ट को सौंपकर यथावत् सद्गुरु महाराज के ही हस्तलिखित सुलेख में प्रकाशित करने की अनुमति दी। हमें आशा है कि श्री शम्भूनाथ वारिकू महोदय इसी तरह सद्गुरु महाराज से सम्बन्धित अन्य लिखित/श्रव्य/दृश्य सामग्री विना किसी मोह के ट्रस्ट को सौंपकर लोकोपकार करके परमकल्याण के भागी बनेंगे।

इस पारमार्थिक लाभदायिका पुस्तिका का आज की गुरुजन्म जयन्ती के अवसर पर प्रकाशित होना सारे गुरु परिवार के लिए आध्यात्मिक उन्नति का सूचक है।

जय गुरुदेव

वैशाख कृष्ण द्वादशी
सद्गुरु जन्म जयन्ती
रविवार मई ४, १९९७

इन्द्रकृष्ण रैणा
सचिव
ईश्वर आश्रम ट्रस्ट
निशात, श्रीनगर, काश्मीर

ॐ

(संक्षिप्तस्नानविधिः)

(दोनों हाथ धोवें)

ॐ यो विश्वचक्षुरुत विश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात्। संबाहुभ्यां धमति संपतत्रै— र्द्यावापृथिवी जनयन्देव एकः॥

(बायां पाद धोवें)

ॐ नमोऽस्त्वनन्ताय सहस्रमूर्त्तये, सहस्रपादाक्षि-शिरोरुबाहवे। सहस्रनाम्ने पुरुषाय शाश्वते, सह-स्रकोटीयुगधारिणे नमः॥

(दायां पाद धोवें)

ॐ नमः कमलनाभाय नमस्ते जलशायिने। नमस्ते केशवानन्त वासुदेव नमोऽस्तु ते॥

(तीन कुलियां करके जल उठाकर पढ़ें)

गंगा प्रयाग गयनैमिषपुष्करादितीर्थानि यानि भुवि सन्ति हरिप्रसादात्। आयान्तु तानि करपद्मपुटे मदीये प्रक्षालयन्तु वदनस्य निशाकलङ्कम्॥

(उसी जल से मुँह धोवें)

तीर्थे स्नेयं तीर्थमेव समानानां भवति मानः। शंसो अरुषो धूर्तिः प्रणङ् मर्त्यस्य रक्षाणो ब्रह्मणस्पते॥

{यज्ञोपवीत को हाथों के अंगूठों में रखकर
तीन बार पढ़ते धोयें}

ओं गायत्र्यै नमः ओं भूर्भुवः स्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्॥३॥

(यज्ञोपवीत डालते पढ़ें)

यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्। आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः। यज्ञोपवीतमसि यज्ञस्य त्वोपवीतेन उपनह्यामि॥

(शिखा को खोलें **धोयें और बान्धें**)

ओं गायत्र्यै नमः ओं भूर्भुवः स्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्॥

(तीन आचमन करें)

ओं - ओं - ओं॥

(माथे से लेकर सारे अंगों पर जल छिड़कें)

ओं ओं, ओंभूः, ओं भुवः, ओंस्वः, ओंमहः, ओंजनः, ओं तपः, ओंसत्यम्॥

(प्राणायाम करें)

ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यम्, ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ओं आपोज्योतीरसोऽमृतं ब्रह्मभूर्भुवःस्वरोम्॥

१ पू० - २ कुं० - ३ रे०॥

(तर्पण करें)

ओं तत्सद्ब्रह्म अद्यतावत्तिथावद्य — मासस्य — पक्षस्य — तिथौ, आत्मनो वाङ्मनः-कायोपार्जित पापनिवारणार्थं जलप्रवाहे स्नानमहं करिष्ये ओं कुरुष्व ॥

(स्नान करें)

ओं तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततम्, तद्विप्रासो विपन्यवो जागृवांसः समिन्धते विष्णोर्यत्परमं पदम् ॥

(माथे पर सात मार्जन करें)

ओं भूः, ओंभुवः, ओं स्वः, ओं महः, ओंजनः, ओं तपः, ओं सत्यम् ॥

(पूर्व की तरफ या जल की तरफ उपस्थान करें)

ओं हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथि-र्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥

(वस्त्रों को डालते पढ़ें)

सुवा सुवासाः परिवीत आगात्, स उच्छ्रेयान् भवति जायमानः । तन्धीरासः कवयः उन्नयन्ति सध्यो मनसा देवयन्तः ॥

(इति स्नानविधिः)

(अथ संक्षिप्त- संध्योपासनविधिः)

(नमस्कार धरकर पढ़ें)

ओं श्रीमहागायत्र्यै नमः सावित्र्यै नमः सरस्वत्यै नमः । ओं प्रणवस्य ऋषिर्ब्रह्मा गायत्रं छन्द एव च । देवोऽग्निर्व्याहृतिषु च विनियोगः प्रकीर्तितः । प्रजापतेर्व्याहृतयः पूर्वस्य परमेष्ठिनः, व्यस्ताश्चैव समस्ताश्च ब्राह्ममक्षरमोमिति । व्याहृतीनां समस्तानां दैवतं तु प्रजापतिः, व्यस्तानामयमग्निश्च त्रायुः सूर्यश्च देवताः । छन्दश्च व्याहृतीनामेकाक्षराणामुक्तारव्यं द्व्यक्षराणामत्युक्तारव्यं विश्वामित्र ऋषिश्छन्दो गायत्रं सविता तथा । देवतोपनये जप्ये गायत्र्या योग उच्यते । आवाहयामि गायत्रीं सर्वपापप्रणाशिनीम् न गायत्र्याः परं जप्यं न व्याहृतिसमं हुतम् । आगच्छ वरदे देवि जप्येमे सन्निधौ भव । गायन्तं त्रायसे यस्माद्गायत्री त्वं ततः स्मृता । अग्निर्वायुश्च

सूर्यश्च बृहस्पत्याप एव च। इन्द्रश्च विश्वे देवाश्च देवताः समुदाहृताः। एवमार्षं छन्दो दैवतं विनियोगं चानुस्मृत्य। गायत्र्या शिखामाबध्य गायत्र्यैव समन्ततः॥

(अञ्जलि धर कर पढ़ें)

ओं ओजोऽसि सहोऽसि बलमसि भ्राजोऽसि देवानां धाम नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूः॥

(प्राणायाम करें)

ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यम् ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ओं आपो ज्योतीरसोऽमृतं ब्रह्मभूर्भुवः स्वरोम्॥ १-२-३॥

(सायं के तीन आचमन)

ओं अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम्। यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुम्पतु। यत्किंचिद् दुरितं मयि-इदमहं माममृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा।

ओं। ओं। ओं॥

(प्रभात के तीन आचमन)

ओं सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्यु-
कृतेभ्यः पापेभ्यो रक्षन्ताम् । यदह्ना
पापमकार्षं मनसा वाचा हस्ताभ्याम् प-
द्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु । य-
त्किंचिद् दुरितं मयि इदमहं माममृतयोनौ
सूर्ये ज्योतिषि जुहोमि स्वाहा ॥ ओं, ओं, ओं ॥

(मध्याह्न के तीन आचमन)

ओं आपः पुनन्तु पृथिवीं पृथिवी पूता
पुनातु माम् । पुनन्तु ब्रह्मणस्पतिर्ब्रह्म
पूतं पुनातु माम् । यदुच्छिष्टमभोज्यं वा
यद्वा दुश्चरितं मम सर्वं पुनन्तु मामापो
असतांच प्रतिग्रहं जुहोमि स्वाहा ।
ओं - ओं - ओं ॥

(मार्जन करें)

ओं आपो हिष्ठामयो भुवः । —— हृदय पर
ता न ऊर्जे दधातन । —— पादों पर
महेरणाय चक्षसे । —— ललाट पर
यो वः शिवतमो रसः । —— ललाट पर

तस्य भाजयतेह नः । —— पादों पर

उशतीरिव मातरः । —— हृदय पर

तस्मा अरंगमाम वः । —— ललाट पर

यस्य क्षयाय जिन्वथ । —— हृदय पर

आपो जनयथा च नः । —— पादों पर

(ललाट पर मार्जन करें)

ओं हिरण्यवर्णाः शुचयः पावका, यासु जातः
कश्यपो यास्विन्द्रः । या अग्निं गर्भं दधिरे
विरूपास्ता न आपः शंस्योना भवन्तु ॥

यासां देवा दिवि कृण्वन्ति भक्ष्यं या अन्तरिक्षे
बहुधा भवन्ति । या अग्निं गर्भं दधिरे विरूपा-
स्ता न आपः शंस्योना भवन्तु ॥

यासां राजा वरुणो याति मध्ये सत्यानृतेअव-
पश्यञ्जनानाम् । या अग्निं गर्भं दधिरे विरूपा-
स्ता न आपः शंस्योना भवन्तु ॥

शिवेन मा चक्षुषा पश्यतापः शिवया तन्वो-
पस्पृशत त्वचं मे । मधुश्च्युतः शुचयो याः
पावकास्ता न आपः शंस्योना भवन्तु ॥

(हाथ पर पानी डालकर वापस छोड़ें)

ओं शन्नो देवीरभीष्टये आपो भवन्तु पीतये,
शंय्योरभिस्रवन्तु नः ॥

(अब उसी जल से मार्जन करें)

ओं शन्न आपो धन्वन्याः शन्नः सन्त्वनूप्याः
शन्नः समुद्रिया आपः शमुनः सन्तु कूप्याः ।
ओं आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो
घृतप्वः पुनन्तु । विश्वं हि रिप्रं प्रवहन्ति
देवीः । उदिदाभ्यः शुचिरापूत एमि । ओं
इदमापः प्रवहत यत्किंचिद्दुरितं मयि, यद्वा-
हमभिदुद्रोह यद्वा शेप उतानृतम् ।
ओं मुञ्चन्तु मा शपथ्यादथो वारुण्यादुत
अथो यमस्य पड्वीशात्सर्वस्मादेव किल्बिषात्
ओं यज्जाग्रद्यत्सुप्तः पापमभिजगाम सर्वस्मा-
न्मा तस्मादेनसः प्रमुञ्चतु ॥

(जल में हाथों से आवर्तन करें)

ओं ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत
ततो रात्र्यजायत ततः समुद्रो अर्णवः । समु-
द्रादर्णवादधि संवत्सरो अजायत अहोरात्राणि
विदधद्विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौ
धाता यथापूर्वमकल्पयत् दिवं च पृथिवीं वा-
न्तरिक्षमथो स्वः ॥

(माथे पर सात मार्जन करें)

ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यम् ॥

(प्राणायाम करें)

ओं भूः ओं भुवः ओं स्वः ओं जनः ओं तपः ओं सत्यम् ओं तत्स-
वितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचो-
दयात् ओं आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् ॥१-२-३

(तीन आचमन करें)

ओं अन्तश्चरसि भूतेषु गुहायां विश्वतो मुखः। त्वं
यज्ञस्त्वं वषट्कारः आपो ज्योतीरसोऽमृतम् ब्रह्म-
भूर्भुवःस्वरोम् — ओं - ओं - ओं ॥

(सूर्यदेवता का ध्यान करके तीन बार जलाञ्जलि देवें)

ओं भूर्भुवः स्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि
धियो यो नः प्रचोदयात् ओं ॥ ३ ॥

(उपस्थान करें)

ओं उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम् देवं
देवत्रा सूर्यमगन्म ज्योतिरुत्तरम्। ओं उदुत्यं जात-
वेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्। ओं
चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः
आप्राद्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्त-
स्थुषश्च। ओं तच्चक्षुर्देवहितं पुरस्तात् शुक्रमुच्चरत्। प
श्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः
शतं प्रब्रवाम शरदः शतम्। अदीनः स्याम शरदः
शतं भूयश्च शरदः शतात् ॥

{भगवान् नारायण का ध्यान करते
अञ्जलि धर कर पढ़ें}

ओं आनुष्टुभस्य सूक्तस्य विष्टुबन्तस्य देवता।
विश्वात्मा पुरुषः साक्षद्दृषिर्नारायणः स्मृतः ॥
ओं पुरुषमेधः पुरुषस्य नारायणस्यार्षम्। ओं
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स
भूमिं विश्वतो वृत्वा अत्यातिष्ठद्दशांगुलम्। पुरुष
एवेदं सर्वं यद्भूतं यच्च भव्यम्। उतामृतत्वस्येशानो
यदन्नेनातिरोहति ॥ एतावानस्य महिमातोज्या-
यांश्च पूरुषः। पादोऽस्य विश्वा भूतानि त्रिपाद-
स्यामृतं दिवि ॥ त्रिपादूर्ध्व उदैत्पुरुषः पादोऽ-
स्येहाभवत्पुनः। ततो विष्वङ् व्यक्रामत्साशना-
नशने अभि ॥ तस्माद्विराडजायत विराजो अधि
पूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिम-
थो पुरः ॥ यत्पुरुषेण हविषा देवा यज्ञमतन्वत
वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः॥
तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः। तेन
देवा अयजन्त साध्या ऋषयश्च ये। तस्माद्यज्ञा-
त्सर्वहुतः संभृतं पृषदाज्यम्। पशूँस्ताँश्चक्रे
वायव्यानारण्यान्ग्राम्याश्च ये ॥ तस्माद्यज्ञात्सर्व-
हुत ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे

तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत । तस्मादश्वा अजायन्त ये के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते । ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत । चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत । नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकानकल्पयन् । सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् । यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥

(अब शिवसंकल्प करके अञ्जलि धर कर पढ़ें)

ओं यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति । दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु ॥ १ ॥

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः । यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥ २ ॥

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तर-
मृतं प्रजासु । यस्मान्न ऋते किञ्चन कर्म क्रि-
यते तन्मे मनः शिवसंकल्पमस्तु ॥३॥
येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन
सर्वम् । येन यज्ञस्तायते सप्तहोता तन्मे मनः
शिवसंकल्पमस्तु ॥४॥
यस्मिन्नृचः साम यजूँषि यस्मिन्प्रतिष्ठिता
रथनाभाविवाराः । यस्मिंश्चित्तं सर्वमोतं प्र-
जानां तन्मे मनः शिवसंकल्पमस्तु ॥५॥
सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेभीषु-
भिर्वाजिन इव । हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे
मनः शिवसंकल्पमस्तु ॥६॥

(उपस्थान करें)

शुक्रियं रुद्रस्य य उदगात्पुरस्तान्महतो अर्णवा-
द्विभ्राजमानः सरिरस्य मध्ये स मामृषभो रो-
हिताक्षः सूर्यो विपश्चिन्मनसा पुनातु । यद्ब्रह्मा-
वादिष्म तन्मा मा हिंसीत्सूर्याय विभ्राजाय वै
नमो नमः ॥

(न्यास करें)

अ नाभौ । उ हृदि । म शिरसि । भूः पादयोः ।
भुवः ⌐ हृदि । स्वः शिरसि । ओं भूः अंगुष्ठाभ्यां
नमः । ओं भुवस्तर्जनीभ्यां नमः । ओं स्वर्मध्यमा-

भ्यां नमः। ओं महः अनामिकाभ्यां नमः। ओं जनः कनिष्ठिकाभ्यां नमः। ओं तपः सत्यं करतल-करपृष्ठाभ्यां नमः।

ओं भूः पादयोः। भुवः जान्वोः। स्वः गुह्ये। महः नाभौ। जनः हृदि। तपः कण्ठे। सत्यं शिरसि।

ओं भूः हृदयाय नमः। भुवः शिरसे स्वाहा। स्वः शिखायै वषट्। महः कवचाय हुम्। जनः नेत्राभ्यां वौषट्। तपः सत्यमस्त्राय फट्॥

ओं तत्सवितुरङ्गुष्ठाभ्यां नमः। वरेण्यं तर्जनीभ्यां नमः। भर्गो देवस्य मध्यमाभ्यां नमः। धीमहि अनामिकाभ्यां नमः। धियो यो नः कनिष्ठिकाभ्यां नमः। प्रचोदयात् करतलकरपृष्ठाभ्यां नमः॥

ओं तत्पादयोः। सवितुर्जान्वोः। वरेण्यं कट्याम्। भर्गो नाभौ। देवस्य हृदये। धीमहि कण्ठे। धियो नासिकायाम्। यश्चक्षुषोः। नः ललाटे। प्रचोदयाच्छिरसि॥

ओं तत्सवितुर्हृदयाय नमः। वरेण्यं शिरसे स्वाहा। भर्गो देवस्य शिखायै वषट्। धीमहि कवचाय हुँ। धियो यो नः नेत्राभ्यां वौषट्। प्रचोदयादस्त्राय फट्॥ आपः स्तनयोः। ज्योतिर्नेत्रयोः। रसो मुखे। अमृतं ललाटे। ब्रह्मभूर्भुवःस्वरों शिरसि॥

(गायत्री जप के लिये तर्पण करें)

ओं तत्सवितुरिति मंत्रस्य विश्वामित्र ऋषिः
गायत्रं छन्दः सविता देवता आत्मनो वाङ्-
मनः कायोपार्जित पापानिवारणार्थे चतुर्विग-
सिद्ध्यर्थे जपे विनियोगः ॥

(श्रीमहागायत्री का ध्यान करें)

मुक्ताविद्रुम हेमनीलधवलच्छायैर्मुखैस्त्रीक्षणै-
र्युक्तामिन्दु निबद्ध रत्नमुकुटां
तत्त्वात्मवर्णात्मिकाम् ।
गायत्रीं वरदाभयांकुशकरां
शूलं कपालं गुणं
शङ्खं चक्रमथारविन्दयुगलं
हस्तैर्वहन्तीं भजे ॥

(तीन बार पढ़ें)

आगच्छ वरदे देवि त्र्यक्षरे ब्रह्मवादिनि।
गायत्रि छन्दसां मातर्ब्रह्मयोने नमोऽस्तु ते ॥३॥

(प्राणायाम करें)

ओंभूः ओंभुवः ओंस्वः ओंमहः ओंजनः ओंतपः
ओंसत्यम् ओं तत्सवितुर्वरेण्यं भर्गो देवस्य

धीमहि धियो यो नः प्रचोदयात्। ओं
आपो ज्योती रसोऽमृतं ब्रह्मभूर्भुवः-
स्वरोम्॥ १ पू०, २ कुं०, ३ रे०॥

(जप करें)

ओं भूर्भुवः स्वस्तत्सवि-
तुर्वरेण्यं भर्गो देवस्य
धीमहि धियो यो
नः प्रचोदयात् ओं ॥१०८॥

(जप समाप्त होने पर प्राणायाम करें)

ओंभूः ओंभुवः ओं स्वः ओं महः ओं जनः ओंतपः ओं
सत्यम्। ओं तत्सवितुर्वरेण्यं भर्गो देवस्य
धीमहि धियो यो नः प्रचोदयात्। ओं आपो
ज्योती रसोऽमृतं ब्रह्मभूर्भुवः स्वरोम्॥ १-२-३॥

(तर्पण करें)

ओं देवा गातुविदो गातुं वित्त्वा गातुमित
मनस्पत इमं देवयज्ञं स्वाहा वाते धाः।

(नमस्कार करें)

दशभिर्जन्मचरितं शतेन तु पुरा कृतम्।
त्रियुगं तु सहस्रेण गायत्री हन्ति किल्बिषम्॥

(अब देवर्षितर्पण करें) (जपसव्येन)

ओं तत्सद्ब्रह्म अद्यतावन्निथावद्य - मन्वस्य - पक्षस्य - वारासनान्वितायां पित्रे पितामहाय प्रपितामहाय मात्रे पितामह्यै प्रपितामह्यै मातामहाय प्रमातामहाय वृद्धप्रमातामहाय मातामह्यै प्रमातामह्यै वृद्धप्रमातामह्यै ∧ समस्तमातापितृभ्यो द्वादशदैवतेभ्यः पितृभ्यः हिमपानं स्वधा क्षीरपानं स्वधा मधुपानंस्वधा तिलोदकं स्वधा हिमं हिमं रजते रजतम् ॥

(सव्येन)

वसन्ताय नमः ग्रीष्माय नमः वर्षाभ्यो नमः शरदे नमः हेमन्ताय नमः शिशिराय नमः षड्ऋतुभ्यो नमः। देवा सुरास्तथा यक्षा नागा गन्धर्वकिन्नरा पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास्तरव खगाः ॥

(कण्ठोपवीती)

जलेचरा भूनिलया वायव्याधाराश्च जन्तवः।
तृप्तिमेते प्रयान्त्वाशु मद्दत्तनाम्बुनाखिलाः ॥

(अपसव्येन)

नरकेषु च सर्वेषु यातनासु च ये स्थिताः। तेषामाप्यायनायैतद्दीयते सलिलं मया ॥ येषां गृहे मया भुक्तं येषां भुञ्जाम्यहं पुनः। पुत्रदारविहीनाश्च नरकेवावसन्ति मे। तेभ्यः सर्वेभ्यः पितृभ्यः इदमस्तु तिलोदकम् ॥ (सव्येन)

ओं नमोदेवेभ्यः (कण्ठोपवीती) स्वाहा ऋषिभ्यः अपसव्येन स्वधा पितृभ्यः सव्येन आब्रह्मस्तम्बपर्यन्तं ब्रह्माण्डं सचराचरं जगत् तृप्यतु तृप्यतु तृप्यतु एवमस्तु ॥

(सूर्यभगवान् को नमस्कार करें)

नमो घर्मनिधानाय नमः सुकृतसाक्षिणे।
नमः प्रत्यक्षदेवाय भास्कराय नमो नमः ॥

ओं शांतिः!!!

(इति संक्षिप्तसंध्योपासनविधिः)

ओं

अथ श्रीगुरुगीता

नमामि सद्गुरुं शांतं प्रत्यक्षं शिवरूपिणम्।
शिरसा योगपीठस्थं धर्मकामार्थसिद्धये॥१॥
श्रीगुरुं परमानन्दं वन्दाम्यानन्दविग्रहम्।
यस्य सान्निधिमात्रेण चिदानन्दायते परम्॥२॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥३॥
अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः॥४॥
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुः साक्षान्महेश्वरः।
गुरुरेव जगत्सर्वं तस्मै श्रीगुरवे नमः॥५॥
नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे।
विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह॥६॥
नवाय नवरूपाय परमार्थैकरूपिणे।
सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते॥७॥

स्वतंत्राय दयाकृन्नाविग्रहाय परात्मने ।
परतंत्राय भक्तानां भव्यानां भव्यरूपिणे ॥ ८ ॥
ज्ञानिनां ज्ञानरूपाय प्रकाशाय प्रकाशिनाम् ।
विवेकिनां विवेकाय विमर्शाय विमर्शिनाम् ॥ ९ ॥
पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः ।
सदा सान्निध्यरूपेण करोमि तव शासनम् ॥ १० ॥
प्रकाशानन्दनाथं च विमर्शानन्दनाथकम् ।
आनन्दानन्दनाथं च दिव्यौघं गुरुमण्डलम् ॥ ११ ॥
श्रीसत्यानन्दनाथाहं श्रीज्ञानानन्दनाथकम् ।
श्रीपूर्णानन्दनाथं च सिद्धौघान्पूजयाम्यहम् ॥ १२ ॥
प्रतिभानन्दनाथारण्यं स्वभावानन्दनाथकम् ।
श्रीसुधानन्दनाथाहं मानवौघान्गुरून्भजे ॥ १३ ॥
ध्यानमूलं गुरोर्मूर्त्तिः पूजामूलं गुरोः पदम् ।
मन्त्रमूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा ॥ १४ ॥
येन प्रकाशितं ज्योतिः शिष्यमोहतमोऽपहम् ।
कारुण्यामृतपूर्णाय तस्मै श्रीगुरवे नमः ॥ १५ ॥
आब्रह्मस्तम्भपर्यन्तं यस्य मे गुरुसंततिः ।
तस्य मे सर्वशिष्यस्य कोन पूज्यो महीतले ॥ १६ ॥

गुरुः शिवः समाख्यातो गुरुः परमकारणम् ।
गुरौ तुष्टे जगत्तुष्टं सदेवासुरमानुषम् ॥१७॥
गुरुरेव परो मंत्रो गुरुरेव परो जपः ।
गुरुरेव परा विद्या नास्ति किंचिद्गुरुं विना ॥१८॥
श्रीगुरुं द्विभुजं शान्तं वराभयकराम्बुजम् ।
पूर्णेन्दुवदनाम्भोजं हसन्तं शक्तिसंयुतम् ॥१९॥
श्वेतवस्त्रपरीधानं नानालङ्कारभूषणम् ।
आनन्दमुदितं देवं ध्यायेत्पंकजासंस्थितम् ॥२०॥
यो गुरुः स शिवः प्रोक्तो यः शिवः स गुरुः स्मृतः ।
उभयोरन्तरं नास्ति गुरोरपि शिवस्य च ॥२१॥
गुरुः शिवगतो ज्ञेयः शिवो गुरुमुखोद्गतः ।
यो गुरुः स शिवः साक्षात्पूजनीयः प्रयत्नतः ॥२२॥

गोभिर्यस्य विरन्तराभिरभितो
द्वैतान्धकारक्षयात्
सर्वाशाप्रविकासनेन पुरुषाः
सुप्ताः प्रबुद्धाः कृताः ॥
पादा तस्य जयन्ति सद्गुरुमहा-
हंसस्य यत्प्रक्रमैः ।

भिन्ना मन्मानिषट् पदी रसयति
श्रीशैवशास्त्राब्जिनीम् ॥ २३॥
कर्त्तव्याकरणानि तद्गुरुपदा -
म्बोजस्तवे चातुरी ।
जिह्वीभूयाविवर्जितात्मगुणसं-
योगैर्भवद्भिः ध्रुवम् ।
तर्कव्याकरणागमैः सह महा-
पुण्योपलभ्यैर्यतो
यूय यत्प्रतिपादितैः सफलतां
सेवध्वमस्मिन्भवे ॥ २४॥ ?

ब्रह्मानन्दं, परमसुखदं, केवलं ज्ञानमूर्त्तिम्,
द्वन्द्वातीतं, गगनसदृशं, तत्वमस्यादिलक्ष्यम्।
एकं नित्यं, विमलमचलं, सर्वदा साक्षिभूतं
भावातीतं, त्रिगुणरहितं, सद्गुरुं तं नमामि,॥ २५॥

तावदाप्तिर्भयं तावत्तावच्छोकभ्रमादयः।
यावन्नायाति शरणं, श्रीगुरोःपादुकास्मृतिम्॥२६॥

श्रीदेव्युवाच

प्रायश्चित्तविहीनस्य (कर्मणः) पतनं भोगाय केवलम्।
सर्वसाक्षी महादेवो नरकानसृजत्पुनः॥२७॥

तस्मात्सर्वप्रयत्नेन प्रायश्चित्तमिहैव तु।
कृतस्य कर्मणः कुर्यादवलेपो भवेद्यदि ॥२८॥
प्रामादिकमहादोषप्रावल्यपनकारणम्।
प्रायश्चित्तं परं सत्यं श्रीगुरोः पादुकास्मृतिः॥२९॥
त्वयैवोक्तं महेशान, कथं स्मर्तव्यमीश्वर,।
वद मे कृपया देव, श्रीगुरोः पादुकास्मृतिः॥३०॥

श्रीभैरव उवाच

शृणु देवि प्रवक्ष्यामि, श्रीगुरोः पादुकास्मृतिम्।
प्रायश्चित्तविहीनानां, सर्वपापहरं कलौ ॥३१॥
यस्य श्रीपादरजसा, रञ्जयन्मस्तकं शिवः।
रमते सह पार्वत्या तस्य श्रीपादुकास्मृतिः॥३२॥
यो मोहतमसाक्रान्तमुद्धरत्यन्धकूपतः।
केवलं कृपया नाथः, तस्य श्रीपादुकास्मृतिः॥३३
यस्य त्रैलोक्यमाखिलं, सच्चिदानन्दलक्षणम्।
पूर्यते स्वगुणैः शक्त्या, तस्य श्रीपादुकास्मृतिः॥३४
यस्य त्रैलोक्यमाखिलं वशे तिष्ठत्यशेषतः।
सदृष्टिपातमात्रेण तस्य श्रीपादुकास्मृतिः॥३५
यस्मै सर्वस्वमात्मानमेकीकृत्यापि भक्तितः।
समर्पयति साक्षिप्यस्तस्य श्रीपादुकास्मृतिः॥३६॥

यमाश्रित्यात्मविज्ञानं संविदे मृगयामहे।
हेतुकैर्मोषितं दोषैस्तस्य श्रीपादुकास्मृतिः॥३६॥
यस्मिन्सृष्टिस्थितिध्वंसतिरोधानानुग्रहात्मकम्।
प्रकाश्यते पञ्चकृत्यं तस्य श्रीपादुकास्मृतिः॥३८॥
मूले हृदि ललाटे च द्वादशांते परःशिवः।
यस्याज्ञां पालयन्नास्ते तस्य श्रीपादुकास्मृतिः॥३९॥
यस्य पादतले सिन्धुः,पादाग्रे कुलपर्वताः।
गुल्फे नक्षत्रवृन्दानि,तस्य श्रीपादुकास्मृतिः॥४०
वनस्पतिस्तथा रोम्नि शतरुद्राश्च जङ्घयोः।
जान्वोः त्रिदशसंदोहास्तस्य श्रीपादुकास्मृतिः॥४१॥
आधारे परमाशक्तिः,नाभिचक्रे हृदाश्रयोः।
योगिनीनां चतुःषष्टिस्तस्य श्रीपादुकास्मृतिः॥४२॥
हृदये मातरःकण्ठे शिरःपीठोपपीठयोः।
चिबुके यस्य देवश्च तस्य श्रीपादुकास्मृतिः॥४३॥
यज्ञःकपोलयुग्मे च जिह्वाग्रे च सरस्वती।
यस्य दन्तेषु मंत्रश्च तस्य श्रीपादुकास्मृतिः॥४४॥
स्कन्दे च खेचरा देवास्त्रिनेत्रे तेजसश्चयः।
त्रिपित्रयं ललाटे च तस्य श्रीपादुकास्मृतिः॥४५॥
इडापिंगलयोरत्र गंगा च यमुना तथा।
मध्ये सरस्वती यस्य तस्य श्रीपादुकास्मृतिः॥४६॥

आद्यन्ते दृढभेदस्य पशुपाशविमोचनम्।
यामाहुः शाम्भवी वाचस्तस्य श्रीपादुकास्मृतिः॥४६॥
ऊर्वोश्च सिद्धवीरेन्द्राः लिंगमूले च भैरवः।
लिंगाग्रेऽप्सरसो यस्य तस्य श्रीपादुकास्मृतिः॥४८॥
गुरुः शिवो गुरुर्विष्णुर्गुरुर्ब्रह्मा गुरुः परः।
गुरुरग्निर्गुरुर्मन्त्रो भानुरिन्द्रस्तथैव च॥४९॥
अन्यत्सर्वं सप्रपञ्चं निष्प्रपञ्चं गुरुः स्मृतः।
तस्माच्छ्रीपादुकाध्याने सर्वपापनिकृन्तनम्॥५०॥
श्रीगुरोः पादुकास्तोत्रं प्रातरुत्थाय यः पठेत्।
नश्यन्ति सर्वपापानि वह्निना तूलराशिवत्॥५१॥
पठितव्यं प्रयत्नेन श्रोतव्यं भक्तिशालिभिः।
भोगमोक्षार्थिभिस्तस्मात्सद्भिरागमपारगैः॥५२॥
गुरुगम्यं भवेत्सर्वं गुरुरेव प्रजापतिः।
गुरौ तुष्टे हरस्तुष्टस्तस्मै श्रीगुरवे नमः॥५३॥
येनाभेदप्रकाशेन भेदध्वान्तं विलापितम्।
नौमि तं सद्गुरुं हंसं हृत्पङ्कजविकासकम्॥५४॥
महारोगे महोत्पाते महादुःखे महाभये।
महापदि महापाये स्मृता रक्षति पादुका॥५५॥
गुरुरेव परादेवी गुरुरेव परागतिः।
गुरुमुल्लङ्घ्य यः कुर्यात्किंचित्स निरयं व्रजेत्॥५६॥

श्रीमत्परंब्रह्मगुरुं नमामि
श्रीमत्परंब्रह्मगुरुं भजामि।
श्रीमत्परंब्रह्मगुरुं वदामि
श्रीमत्परंब्रह्मगुरुं स्मरामि ॥५७॥

गुकारस्त्वन्धकारः स्याद्रुकारस्तन्निरोधकः।
अन्धकारनिरोधेन गुरुरित्यभिधीयते ॥५८॥
गुरवो बहवः सन्ति शिष्यवित्तापहारकाः।
दुर्लभोऽयं गुरुर्देवि शिष्यसन्तापहारकः ॥५९॥

वन्दे श्रीविमलं प्रसन्नवदनं कारुण्यरूपं परं
ध्यानासक्तहृदम्बुजं सुरसरिन्मौलिं त्रिनेत्रं हरम्।
त्रैगुण्यावृतमानसं भगवते भक्तिप्रदं चिन्मयम्
ध्यायेत्फुल्लसरोरुहाक्षि सततं देवं शिवाख्यं गुरुम् ॥६०॥

यस्य स्मरणमात्रेण ज्ञानमुत्पद्यते स्वयम्।
स एव सर्वसंपत्तिस्तस्मै श्रीगुरवे नमः ॥६१॥
चैतन्यं सुशिवं शांतं व्योमातीतं निरञ्जनम्।
नादबिन्दुकलातीतं तस्मै श्रीगुरवे नमः ॥६२॥

येनस्मृतेन भवपाशनिकृन्तनैका
संवित्समुल्लसति सर्वगता शिवाख्या।
नृणामनुत्तरपदप्रविकासहेतुः
तस्मै नमोऽस्तु गुरवे परमेश्वराय ॥६३॥

घोरसंसारकान्तारसमुत्तारैकहेतवे।
नमस्ते चित्स्वरूपाय शिवाय गुरवे नमः ॥६४॥
अहंममेति विच्छन्नमदौघोऽज्ञानवारणः।
निहतो लीलया येन गुरुसिंहं नमामि तम् ॥६५
नमोऽस्तु गुरवे तस्मै इष्टदेवस्वरूपिणे।
यस्य वागमृतं हंति विषं संसारसंज्ञकम् ॥६६॥
कोटिकोटिमहादानात्कोटिकोटिमहाव्रतात्।
कोटिकोटिमहायज्ञात्परा श्रीपादुकास्मृतिः ॥६७
कोटिमंत्रजपात्कोटि पुण्यतीर्थावगाहनात्।
कोटिदेवार्चनाद्देवि परा श्रीपादुकास्मृतिः ॥६८॥
सकृच्छ्रीपादुकां देवि योवा जपति भक्तितः।
स सर्वपापरहितः प्राप्नोति परमां गतिम् ॥६९॥
श्रीस्वामिचरणाम्बोजं यस्यां दिशि विराजते।
तस्यै दिशे नमस्कुर्याद्भक्त्या प्रतिदिनं प्रिये ॥७०॥
गुरुमूला क्रियाः सर्वा लोकेऽस्मिन्कुलनायिके।
तावत्सेव्यो गुरुर्नित्यं सिद्ध्यर्थं भक्तिसंयुतैः ॥७१
तावद्भ्रमति संसारे सर्वदुःखवशीकृतः।
यावन्नायाति शरणं श्रीगुरुं भक्तवत्सलम् ॥७२॥
तावदाशोधयेच्छिष्यः सुप्रसन्नो यथा गुरुः।
गुरौ प्रसन्ने शिष्यस्य सद्यः पापक्षयो भवेत् ॥७३॥

यदिवा परितुष्टेन गुरुणा यत्र कुत्रचित् ।
मुक्तोऽसीति समादिष्टः शिष्यो मुक्तो भवेत्प्रिये ॥६४॥
अथवा निष्प्रपञ्चेन धाम्ना केनाचिदीश्वरि ।
करोमि गुरुरूपेण पशुपाशविमोचनम् ॥६५॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशयन्ते महात्मनः ॥६६॥
गुरुभक्त्या यथा देवि प्राप्यन्ते सर्वसिद्धयः ।
यज्ञदानतपस्तीर्थव्रताद्यैर्न तथा प्रिये ॥६७॥
किं तीर्थाद्यैर्महायासैः किं व्रतैः कायशोषणैः ।
निर्व्याजसेवां देवेशि भक्त्या कुर्वन्ति ये गुरौ ॥६८॥
कायक्लेशेन महता तपसा वापि यत्फलम् ।
तत्फलं लभते देवि सुखेन गुरुसेवया ॥६९॥
न योगो न तपो नार्चाक्रमः कोऽपि प्रणीयते ।
अम्नाये कुलमार्गेऽस्मिन् भक्तिरेका विशिष्यते ॥७०॥
गुरौ मनुष्यबुद्धिं च मंत्रे चाक्षरबुद्धिमान् ।
प्रतिमासु शिलाबुद्धिं कुर्वाणो नरकं व्रजेत् ॥७१॥
गुरुः पिता गुरुर्माता गुरुर्देवो गुरुर्गतिः ।
शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ॥७२॥
गुर्वर्थं धारयेद्देहं तदर्थं च धनं जयेत् ।
निजप्राणान्परित्यज्य गुरुकार्यं समाचरेत् ॥७३॥

गुर्वाग्रे न तपः कुर्यान्नोपवासादिकं व्रतम् ।
तीर्थयात्रां च नो कुर्यान्नाप्नुयादात्मशुद्धये ॥ ८४ ॥
गुरौ सान्निहिते यस्तु पूजयेदन्यमीश्वरि ।
स याति नरकं घोरं सा पूजा निष्फला भवेत् ॥ ८५ ॥
दर्शनार्थं गुरौ गच्छन् शिष्य शुश्रूषुराम्बिके ।
पदे पदेऽश्वमेधस्य फलमाप्नोति नित्यशः ॥ ८६ ॥
केवलं गुरुशुश्रूषा मत्कृपाकारिणी प्रिये ।
सद्भक्तिसहिता सा च सर्वकामफलप्रदा ॥ ८७ ॥
क्षीयन्ते सर्वपापानि वर्धन्ते पुण्यराशयः ।
सिद्ध्यन्ते सर्वकार्याणि सद्गुरोर्दर्शनात्प्रिये ॥ ८८ ॥
श्रीगुरोरर्चनं पूजा गुरोर्नामस्मृतिर्जपः ।
सर्वाज्ञाकरणं कृत्यं शुश्रूषा भजने गुरौ ॥ ८९ ॥
विनोपचारं नो तिष्ठेद्गुर्वाग्रे नेच्छया विशेत् ।
मुखावलोकी सेवेत तदुक्तं च समाचरेत् ॥ ९० ॥
सदसद्गुरुर्ब्रूयात्तत्कार्यमविशंकया ।
निग्रहेऽनुग्रहे वापि गुरुरेव हि कारणम् ॥ ९१ ॥
गच्छंस्तिष्ठन् स्वपन्नग्रभुञ्जन्प्रपूजयेत् ।
गुर्वाज्ञामेव कुर्वीत तद्गतेनान्तरात्मना ॥ ९२ ॥

सर्वदा निवसेद्भक्त्या शिष्यः श्रीगुरुसंनिधौ।
छायाभूमिपरित्यागी नेतरस्त्वतिभक्तिमान्॥१३॥
अधःस्थे तु गुरावूर्ध्वे न तिष्ठेत्तु कदाचन।
न गच्छेदग्रतस्तस्य न विशेदुत्थिते गुरौ॥१४॥
विषमे वा समे वापि स्थाने तिष्ठन्तमीश्वरि।
श्रीगुरुं न त्यजेद्देवि तदा तिष्ठेद्व्रजेत्ततः॥१५॥
किं बहूक्तेन देवेशि सद्गुरुः परमेश्वरः।
तत्सेवैव परं कार्यं भक्त्या प्राणैर्धनैरपि॥१६॥
संसारजनकारुण्याद्दयया परमेश्वरः।
गुरुरूपेण सर्वत्र स्थितो नास्त्यत्र संशयः॥१७॥
कियद्वक्ष्यामि ते भद्रे महात्म्यं सद्गुरोः परम्।
गुरुभक्तिविहीनानां न मुक्तिर्बहुजन्मभिः॥१८॥
इहलोके भोगसिद्धिः परत्र स्वर्गमुक्तिभूः।
गुरुभक्तैव देवेशि नान्या पन्था इति श्रुतिः॥१९॥
शुक्लाम्बरधरं विष्णुं शशिवर्णं सुशोभितम्।
वरं च वामहस्तेन तत्त्वमुद्रां च दक्षिणे॥१००॥
अमलाविमलगात्रं ज्योतिरेकप्रकाशम्।
प्रभवाविभवसाक्षी सच्चिदानन्द रूपम॥

स्मरस्वस्वभावं क्षेममानन्दानित्यम्
सकलभुवनवासं सद्गुरुं तं नमामि ॥ १०१ ॥

सहस्रदलपङ्कजे सकलशीतरश्मिप्रभम्
वराभयकराम्बुजं विमलगंधपुष्पाम्बरम् ।
प्रसन्नवदनेक्षणं सकलदेवतारूपिणम्
स्मरेच्छिरसि संततंतदभिधानपूर्वं गुरुम् ॥ १०२ ॥

श्रीनाथादिगुरुत्रयं गणपतिं
पीठत्रयं भैरवम् ।
सिद्धेभ्यो वटुकत्रयं पदयुगं
दूतीक्रमं शाम्भवम् ॥
वीरञ्चाष्टचतुष्टषष्टिनवकं
वीरावलीपञ्चकम् ।
श्रीमन्मालिनिमंत्रराज सहितं
वन्दे गुरोर्मण्डलम् ॥ १०३ ॥

इति श्रीकौलार्णवे महातंत्रे
श्रीगुरुगीता समाप्तेति शिवम्

निःसक्तमणिपादुकानियमिताघकोलाहलं
स्फुरत्किसलयारुणं नखसमुल्लसच्चन्द्रकम् ।
परामृतसरोवरोद्यत सरोजसद्रोचिषम्
भजामि शिरसिस्थितं गुरुपदारविन्द द्वयम् ॥ ।

पेरामाऊण्ट प्रिंटोग्रॉफिक्स, 1 अंसारी रोड, नई दिल्ली